भृष्टमङ्गं पक्वतैलं विशोषकम्। अम्लं शुष्कभक्ष्यञ्च
शुष्कपक्वहरीतकी। पिण्डारकमपक्वञ्च रम्भाफलमपक्व-
कम्। वेशवारविम्बवारमनाहारमपानकम्। सप्तं रोच-
नाचूर्णं सप्तं शुष्कशर्करम्। मरीचं पिप्पलीं शुष्कमा-
र्द्रकं जीरकं मधु। द्रव्याण्येतानि गन्धर्वि! सद्यः श्लेष्म-
हराणि च" ब्रह्मवै०ब्रह्म०१६ अ०। [२वृक्षे पु० शब्दच०।
**श्लेष्मल** त्रि० श्लेष्म+अस्त्यर्थे लच्। १कफयुक्ते (बहुयार)
**श्लेष्मह** पु० श्लेष्माणं हन्ति हन-ड। १कट्फलवृक्षे शब्दच०
२श्लेष्मनाशके त्रि०। कफघ्नीशब्दे १६७७पृ० दृश्यम्।
**श्लेष्मात** पु०श्लेष्मणा अतति अत-अच्। श्लेष्मातकवृक्षे शब्दर०
**श्लेष्मातक** पु०श्लेष्मणा स्वसेवनजनितकफेन अतति अत-ण्वुल्
(बहुयार) बहुवारवृक्षे अमरः "बहुवारस्तु शीतः
स्यादुद्दालो बहुवारकः। शेलुः श्लेष्मातकश्चापि पिच्छिलो
भूतवृक्षकः। बहुवारो विषस्फोटव्रणवीसर्पकुष्ठनुत्।
मधुरस्तुवरस्तिक्तः केश्यश्च कफपित्तहृत्। फलमामन्तु
विष्टम्भि रूक्षं पित्तकफास्रजित्। तत् पक्वं मधुरं स्निग्धं
श्लेष्मलं शीतलं गुरु" भावप्र०।
**श्लेष्मान्तक** पु०श्लेष्मणा स्वसेवनजकफेन अन्तक इव नाशकत्वात्
(बहुयार) वृक्षभेदे राजनि०। [श्लोकते अश्लोकिष्ट।
**श्लोक** वर्द्धने संघाते च भ्वा०आ०स०सेट् ऋदित् चङि न ह्रस्वः।
**श्लोक** पु०श्लोक-अच्। चतुःपदात्मके कविकृते १वाक्यभेदे २य-
शसि च अमरः "क उत्तमश्लोकगुणानुवादात्" भाग०१।१
**श्लोण** संघाते भ्वा० पर० सक० सेट् ऋदित् चङि न ह्रस्वः।
श्लोणति अश्लोणीत्।
**श्वःश्रेयस** न० श्वः परदिने भाविकाले श्रेयो यस्मात् अच्
समा०। १मङ्गले अमरः २सुखे ३परमात्मनि च मेदि०।
४कल्याणयुक्ते त्रि०।
**श्वक** सर्पणे भ्वा०आ० सक० सेट् इदित्। श्वङ्कते अश्वङ्किष्ट।
**श्वच** गतौ भ्वा०आ०सक० सेट्। श्वचते अश्वचिष्ट इदिदप्ययम्
**श्वठ** गतौ संस्कारे च चु०उभ०सक० सेट्। श्वठयति-ते अशि-
श्वठत् त। इदिदप्ययम् श्वण्ठयति। [ठत् त।
**श्वठ** दुर्वचने अद० चु० उभ०सक०सेट्। श्वठयति ते अशश्व-
**श्वदंष्ट्रक** पु० शुनो दंष्ट्रेव कण्टकोऽस्य कप्। गोक्षुरे क्षुपे
राजनि०। [अमरः।
**श्वदंष्ट्रा** स्त्री शुनो दंष्ट्रेव कण्टकाकृतत्वात्। गोक्षुरे क्षुपे
**श्वधूर्त्त** पुंस्त्री०शुनि श्वगणे वञ्चनार्थं धूर्त्तः। शृगाले शब्दच०
स्त्रियां ङीष्। [शुनी।
**श्वन्** पु० श्वि-कनिन् नि०। कुक्कुरे तज्जातिस्त्रियां ङीप्

**श्वनिश** न० स्त्री शुनां कुक्कुराणां निशा वा ह्रस्वः। कुक्कु-
रमादकरात्रौ।
**श्वपच** पुंस्त्री० श्वानं पचति भोजनाय पच-अच्।
श्वपाके जातिभेदे। स च अन्त्यावसायिसञ्ज्ञः "चण्डालः
श्वपचः क्षत्ता सूतो वैदेहकस्तथा। मागधायोगवौ चैव
सप्तैतेऽन्त्यावसायिनः। अन्त्यावसायिनामन्नमश्नीयाद् यस्तु
कामतः। स तु चान्द्रायणं कुर्य्यात् तप्तकृच्छ्रमथापि वा"
प्रा०त० अङ्गिराः।
**श्वपाक** पु० श्वानं पचति कर्त्तरि संज्ञायां घञ्। जातिभेदे
"क्षत्तुर्जातस्तथोग्रायां श्वपाक इति कीर्त्त्यते" मनुः।
तद्धर्मश्च चण्डालशब्दे २८४६ पृ० उक्तो दृश्यः।
**श्वफल** पु० शुनः प्रियं फलमस्य। वीजपूरवृक्षे रत्नमा०।
**श्वफल्क** पु०। वृष्णिवंश्ये अक्रूरपितरि क्षत्रियभेदे विष्णुपु०।
**श्वभीरु** पु० श्वभ्यो भीरुः। शृगाले शब्दमा०।
**श्वभ्र** गतौ छिद्रकरणे सक० दौःस्थ्ये अक०चु०उभ० सेट्।
श्वभ्रयति ते अशश्वभ्रत् त।
**श्वभ्र** न० श्वभ्र-अच्। छिद्रे अमरः।
**श्वयथु** पु० श्वि-वृद्धौ अथुच्। शोथे अमरः।
**श्वयीची** स्त्री श्वि-ईचि ङीप्। पीड़ायाम् सि०कौ०।
**श्वल** वेगे भ्वा०पर०अक० सेट्। श्वलति अश्वालीत्।
**श्वल्क** भाषणे चु०उ०स०सेट्। श्वल्कयति ते अशश्वल्कत् त।
**श्वल्ल** वेगे भ्वा०पर० अक० सेट्। श्वल्लति अश्वल्लीत्।
**श्ववृत्ति** स्त्री शुन इव पराधीना वृत्तिः। दास्ये "सेवा श्ववृ-
त्तिराख्याता तस्मात्तां परिवर्जयेत्" मनुः। "दीनदृष्टि-
सन्दर्शनस्वामितर्जननीचक्रियादिधर्मयोगात् श्वतुल्यामिति"
कुल्लू० "न श्ववृत्त्या कदाचन" मनुः। [जटा०।
**श्वव्याघ्र** पु० शुनो व्याघ्रः। कुक्कुरघातके व्याघ्रभेदे (चिते)
**श्वशुर** पु० शु आशु अश्नुते आशु+अश-उरच् पृषो०।
१पत्युः पितरि २भार्य्यायाः पितरि च अमरः।
**श्वशुर्य्य** पु० श्वशुरस्यापत्यम् यत्। १देवरे २श्याले च अमरः।
**श्वश्रू** स्त्री श्वशुरस्य पत्नी ऊङ् उकाराकारलोपश्च। श्वशुर-
भार्य्यायाम् अमरः। श्वश्रूस्नुषयोरविश्वासकारणं वरा-
हपु० उक्तं यथा "एवमुक्ता स चोत्थाय शप्ता नारी
तदा धरे!। या स्नुषाभिः समं शप्ता विश्वासो भवतु
क्वचित्। सा च स्नुषा कदाचित् स्यात् या श्वश्रूं जी-
वतीमिषेत्"। [अमरः।
**श्वस्** अव्य० आगामि अहः पृषो० नि०। आगामिनि दिवसे
**श्वस** जीवने अदा० जक्षा० पर० सक० सेट्। श्वसिति अश्व-